रथाश्वेभनराणान्तु नराश्वेभरथैः क्षतं। पाणिपादैश्च शस्त्रैश्च रथैश्च कदनं महत्।
तथा तस्मिन् बले शूरैर्बध्यमाने हतेऽपि च। अस्मानभ्याययुः पार्था वृकोदरपुरोगमाः।
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः। सात्यकिश्चेकितानश्च द्राविडैः सैनिकैः सह।
वृता व्यूहेन महता पाण्ड्याश्चोलाः सकेरलाः। व्यूढोरस्का दीर्घभुजाः प्रांशवः पृथुलोचनाः।
आपीडिनो रक्तदन्ता मत्तमातङ्गविक्रमाः। नानाविरागवसना गन्धचूर्णावचूर्णिताः।
बद्धासयः पाशहस्ता वारणप्रतिवारणाः। समानमृत्यवो राजन्नात्यजन्त परस्परं।
कलापिनश्चापहस्ता दीर्घकेशाः प्रियंवदाः। पत्तयः सादिनश्चान्ये घोररूपपराक्रमाः।
अथापरे पुनः शूराश्चेदिपाञ्चालकेकयाः। कारूषाः कोशलाः काश्या मागधाश्चापि दुद्रुवुः।
तेषां रथाश्च नागाश्च प्रवराश्चोग्रपत्तयः। नानावाद्यधरैर्हृष्टा नृत्यन्ति च हसन्ति च।
तस्य सैन्यस्य महतो महामात्रवरैर्वृतः। मध्ये वृकोदरोऽभ्यायात्त्वदीयान्नागधूर्गतः।
स नागप्रवरोऽत्युग्रो विधिवत् कल्पितो बभौ। उदयाग्र्यद्रिभवनं यथाभ्युदितभास्करं।
तस्यायसं वर्म्मवरं वररत्नविभूषितं। ताराव्याप्तस्य नभसः शारदस्य समत्विषं।
स तोमरव्यग्रकरश्चारुमौलिस्वलङ्कृतः। शरन्मध्यन्दिनार्काभतेजसा व्यदहद्रिपून्।
तं दृष्ट्वा द्विरदं दूरात् क्षेमधूर्त्तिर्द्विपस्थितः। आह्वयन्नभिदुद्राव प्रमनाः प्रमनस्तरं।
तयोः समभवद्युद्धं द्विपयोरुग्ररूपयोः। यदृच्छया द्रुमवतोर्महापर्व्वतयोरिव।
संसक्तनागौ तौ वीरौ तोमरैरितरेतरं। बलवत्सूर्य्यरश्म्याभैर्भित्त्वाऽन्योन्यं विनेदतुः।
व्यपसृत्य तु नागाभ्यां मण्डलानि विचेरतुः। प्रगृह्य चोभौ धनुषी जघ्नतुर्वै परस्परं।
क्ष्वेडितास्फोटितरवैर्बाणशब्दैस्तु सर्व्वतः। तौ जनं हर्षयन्तौ च सिंहनादं प्रचक्रतुः।
समुद्यतकराभ्यान्तौ द्विपाभ्यां कृतिनावुभौ। वातोद्धूतपताकाभ्यां युयुधाते महाबलौ।
तावन्योन्यस्य धनुषी छित्त्वाऽन्योन्यं विनेदतुः। शक्तितोमरवर्षेण प्रावृण्मेघाविवाम्बुभिः।
क्षेमधूर्त्तिस्तदा भीमं तोमरेण स्तनान्तरे। निर्बिभेदातिवेगेन षड्भिश्चाप्यपरैर्नदन्।
स भीमसेनः शुशुभे तोमरैरङ्गमाश्रितैः। क्रोधदीप्तवपुर्मेघैः सप्तसप्तिरिवांशुमान्।
ततो भास्करवर्णाभमञ्जोगतिमयस्मयं। ससर्ज्ज तोमरं भीमः प्रत्यमित्राय यत्नवान्।
ततः कुलूताधिपतिश्चापमानम्य सायकैः। दशभिस्तोमरं भित्त्वा षष्ट्या विव्याध पाण्डवं।
अथ कार्म्मुकमादाय भीमो जलदनिःस्वनं। रिपोरभ्यर्द्दयन्नागमुन्नदन् पाण्डवः शरैः।
स शरौघार्द्दितो नागो भीमसेनेन संयुगे। गृह्यमाणोऽपि नातिष्ठद्वातोद्धूत इवाम्बुदः।
तमभ्यधावद्द्विरदं भीमो भीमस्य नागराट्। महावातेरितं मेघं वातोद्धूत इवाम्बुदः।
सन्निवार्य्यात्मनो नागं क्षेमधूर्त्तिः प्रतापवान्। विव्याधाभिद्रुतं बाणैर्भीमसेनस्य कुञ्जरं।
ततः साधुविसृष्टेन क्षुरेणानतपर्व्वणा। छित्त्वा शरासनं शत्रोर्नागं सामित्रमार्द्दयत्।
ततः क्रुद्धो रणे भीमं क्षेमधूर्त्तिः पराभिनत्। जघान चास्य द्विरदं नाराचैः सर्व्वमर्म्मसु।

हतो द्रोणश्च कर्णश्च तथा शल्यः प्रतापवान्। वैराग्नेरादिकर्त्ताऽसौ शकुनिः सौबलो हतः।
प्रातिकामी ततः पापो द्रौपद्याः क्लेशकृद्धतः। भ्रातरस्ते हताः सर्व्वे शूरा विक्रान्तयोधिनः।
एते चान्ये च बहवो निहतास्त्वत्कृते नृपाः। त्वामद्य निहनिष्यामि गदया नात्र संशयः।
इत्येवमुच्चैराजेन्द्र भाषमाणं वृकोदरं। उवाच गतभीराजन् पुत्त्रस्ते सत्यविक्रमः। ११६५
किं कत्थनेन बहुना युध्यस्व त्वं वृकोदर। अद्य तेऽहं विनेष्यामि युद्धश्रद्धां कुलाधम।
न हि दुर्य्योधनः क्षुद्र केनचित्त्वद्विधेन वै। शक्यस्त्रासयितुं वाचा यथाऽन्यः प्राकृतो नरः।
चिरकालेप्सितं दृष्ट्या हृदयस्थमिदं मम। त्वया सह गदायुद्धं त्रिदशैरुपपादितं।
किं वाचा बहुनोक्तेन कत्थितेन च दुर्म्मते। वाणी सम्पाद्यतामेषा कर्म्मणा मा चिरं कृथाः।
तस्य तद्वचनं श्रुत्वा सर्व्व एवाभ्यपूजयन्। राजानः सोमकाश्चैव ये तत्रासन् समागताः। ११७०
ततः सम्पूजितः सर्व्वैः सम्प्रहृष्टतनूरुहः। भूयो धीरां मतिञ्चक्रे युद्धाय कुरुनन्दनः।
उन्मत्तमिव मातङ्गं तलशब्दैर्नराधिपाः। भूयः संहर्षयाञ्चक्रुर्दुर्य्योधनममर्षणं।
तं महात्मा महात्मानं गदामुद्यम्य पाण्डवः। अभिदुद्राव वेगेन धार्त्तराष्ट्रं वृकोदरः।
बृंहन्ति कुञ्जरास्तत्र हया हेषन्ति चासकृत्। शस्त्राणि चाप्यदीप्यन्त पाण्डवानां जयैषिणां।
इति श्रीमहाभारते शल्यपर्व्वणि गदायुद्धपर्व्वणि गदायुद्धे सप्तपञ्चाशोऽध्यायः॥ ५७ ॥
॥ सञ्जय उवाच॥ ततो दुर्य्योधनो दृष्ट्वा भीमसेनं तथागतं। प्रत्युद्ययावदीनात्मा वेगेन महता नदन्। ११७५
समापेततुरन्योन्यं शृङ्गिणौ गोवृषाविव। महानिर्घातघोषश्च प्रहाराणामजायत।
अभवच्च तयोर्युद्धं तुमुलं लोमहर्षणं। जिगीषतोर्युधाऽन्योन्यमिन्द्रप्रह्लादयोरिव।
रुधिरोक्षितसर्व्वाङ्गौ गदाहस्तौ मनस्विनौ। ददृशाते महात्मानौ पुष्पिताविव किंशुकौ।
तथा तस्मिन्महायुद्धे वर्त्तमाने सुदारुणे। खद्योतसङ्घैरिव खं दर्शनीयं व्यरोचत।
तथा तस्मिन् वर्त्तमाने सङ्कुले तुमुले भृशं। उभावपि परिश्रान्तौ युध्यमानावरिन्दमौ। ११८०
तौ मुहूर्त्तं समाश्वस्य पुनरेव परन्तपौ। अभ्यहारयतान्योन्यं संप्रगृह्य गदे शुभे।
तौ तु दृष्ट्वा महावीर्य्यौ समाश्वस्तौ नरर्षभौ। बलिनौ वारणौ यद्वद्वाशितार्थे मदोत्कटौ।
समानवीर्य्यौ सम्प्रेक्ष्य प्रगृहीतगदावुभौ। विस्मयं परमं जग्मुर्द्देवगन्धर्व्वमानवाः।
प्रगृहीतगदौ दृष्ट्वा दुर्य्योधनवृकोदरौ। संशयः सर्व्वभूतानां विजये समपद्यत।
समागम्य ततो भूयो भ्रातरौ बलिनाम्वरौ। अन्योन्यस्यान्तरप्रेप्सू प्रचक्रातेऽन्तरं प्रति। ११८५
यमदण्डोपमां गुर्व्वीमिन्द्राशनिमिवोद्यतां। ददृशुः प्रेक्षका राजन् रौद्रीं विशसनीं गदां।
आविध्यतो गदां तस्य भीमसेनस्य संयुगे। शब्दः सुतुमुलो घोरो मुहूर्त्तं समपद्यत।
आविध्यन्तमरिं प्रेक्ष्य धार्त्तराष्ट्रोऽथ पाण्डवं। गदामतुलवेगान्तां विस्मितः सम्बभूव ह।
चरंश्च विविधान्मार्गान् मण्डलानि च भारत। अशोभत तदा वीरो भूय एव वृकोदरः।
तौ परस्परमासाद्य यत्तावन्योन्यरक्षणे। मार्ज्जाराविव भक्षार्थे ततक्षाते मुहुर्मुहुः। ११९०

यथा जीवाः प्राकृतैर्बध्यमाना धर्म्मश्रुतानामुपपीडनाय। एवं धर्म्मा राजधर्म्मैर्व्वियुक्ताः सञ्चिन्वन्तो नाद्रियन्ते स्वधर्म्मं। २३८५

इति श्रीमहाभारते शान्तिपर्व्वणि राजधर्म्मानुशासनपर्व्वणि वर्णाश्रमधर्म्मकथने त्रिषष्टोऽध्यायः॥ ६३॥

॥ भीष्म उवाच॥ चातुराश्रमधर्म्माश्च यतिधर्म्माश्च पाण्डव। लोकवेदोत्तराश्चैव क्षात्त्रधर्म्मे समाहिताः।

सर्व्वाण्येतानि कर्म्माणि क्षात्त्रे भरतसत्तम। निराशिषो जीवलोकाः क्षत्त्रधर्म्मे व्यवस्थिते।

अप्रत्यक्षं बहुद्वारं धर्म्ममाश्रमवासिनां। प्रकोपयन्ति तद्भावमागमैरेव शाश्वतं।

अपरे वचनैः पुण्यैर्व्वादिनो लोकनिश्चयं। अनिश्चयज्ञा धर्म्माणामदृष्टान्ते परे हताः।

प्रत्यक्षं सुखभूयिष्ठमात्मसाक्षिकमच्छलं। सर्व्वलोकहितं धर्म्मं क्षत्त्रियेषु प्रतिष्ठितं। २३९०

धर्म्माश्रमेऽध्यवसिनां ब्राह्मणानां युधिष्ठिर। यथा त्रयाणां वर्णानां संख्यातोपश्रुतिः पुरा।

राजधर्म्मेष्वनुमता लोकाः सुचरितैः सह। उदाहृतन्ते राजेन्द्र यथा विष्णुं महौजसं।

सर्व्वभूतेश्वरं देवं प्रभुं नारायणं पुरा। जग्मुः सुबहुशः शूरा राजानो दण्डनीतये।

एकैकमात्मनः कर्म्म तुलयित्वाश्रमं पुरा। राजानः पर्य्युपासन्त दृष्टान्तवचने स्थिताः।

साध्या देवा वसवश्चाश्विनौ च रुद्राश्च विश्वे मरुतां गणाश्च। सृष्टाः पुराद्यादिदेवेन देवाः क्षात्त्रे धर्म्मे वर्त्तयन्ते च सिद्धाः। २३९५

अत्र ते वर्त्तयिष्यामि धर्म्ममर्थविनिश्चयं। निर्म्मर्य्यादे वर्त्तमाने दानवैकार्णवे पुरा।

बभूव राजा राजेन्द्र मान्धाता नाम वीर्य्यवान्। पुरा वसुमतीपालो यज्ञश्चक्रे दिदृक्षया।

अनादिमध्यनिधनं देवं नारायणं प्रभुं। स राजा राजशार्दूल मान्धाता परमेश्वरं।

जगाम शिरसा पादौ यज्ञे विष्णोर्म्महात्मनः। दर्शयामास तं विष्णूरूपमास्थाय वासवं।

स पार्थिवैर्वृतः सद्भिरर्च्चयामास तं प्रभुं। तस्य पार्थिवसिंहस्य तस्य चैव महात्मनः। २४००

संवादोऽयं महानासीद्विष्णुं प्रति महाद्युतिं।

॥ इन्द्र उवाच॥ किमिष्यते धर्म्मभृतां वरिष्ठ यद्द्रष्टुकामोऽसि तमप्रमेयं। अनन्तमायामितमन्त्रवीर्य्यं नारायणं ह्यादिदेवं पुराणं।

नासौ देवो विश्वरूपो मयाऽपि शक्यो द्रष्टुं ब्रह्मणा वापि साक्षात्। येऽन्ये कामास्तव राजन् हृदिस्था दास्ये चैतांस्त्वं हि मर्त्येषु राजा।

स मे स्थितो धर्म्मपरो जितेन्द्रियः शूरो गूढप्रीतिरतः सुराणां। बुद्ध्या भक्त्या चोत्तमः श्रद्धया च ततस्तेऽहं दद्मि वरान् यथेष्टं।

॥ मान्धाता उवाच॥ असंशयं भगवन्नादिदेवं द्रक्ष्यामि त्वाऽहं शिरसा संप्रसाद्य। त्यक्त्वा कामान् धर्म्मकामो ह्यरण्यमिच्छे गन्तुं सत्पथं लोकदृष्टं। २४०५

क्षात्त्राद्धर्म्माद्विपुलादप्रमेयात् लोकाः प्राप्ताः स्थापितं स्वं यशश्च। धर्म्मो योऽसावादिदेवात् प्रवृत्तो लोकश्रेष्ठं तं न जानामि कर्त्तुं।

॥ इन्द्र उवाच॥ असैनिका धर्म्मपराश्च धर्म्मं परां गतिं न नयन्ते ह्ययुक्तं। क्षात्त्रो धर्म्मो ह्यादिदेवात् प्रवृत्तो लोकश्रेष्ठं तं न जानासि कर्त्तुं।

धर्म्मो भवति स क्षिप्रं प्रलापस्त्वेव साधुषु । तथैतानाकृन्दन्मत्तानपि चावहसन्त्युत ।
महाजना ह्युपावृत्ता राजधर्म्मं समाश्रिताः । न हि सर्व्वहितः कश्चिदाचारः सम्प्रवर्त्तते ।
तेनैवान्यः प्रभवति सोऽपरं बाधते पुनः । दृश्यते चैव स पुनस्तुल्यरूपो यदृच्छया ।
येनैवान्यः प्रभवति सोऽपरानपि बाधते । आचाराणामनैकाग्र्यं सर्व्वेषामुपलक्षयेत् । ९२७५
चिराभिपन्नः कविभिः पूर्व्वं धर्म्म उदाहृतः । तेनाचारेण पूर्व्वेण संस्था भवति शाश्वती ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि धर्म्मलक्षणकथने एकषष्ट्यधिकद्विशततोऽध्यायः ॥ २६१ ॥
॥ भीष्म उवाच ॥ अत्राप्युदाहरन्तीममितिहासं पुरातनं । तुलाधारस्य वाक्यानि धर्म्मे जाजलिना सह ।
वने वनचरः कश्चिज्जाजलिर्नाम वै द्विजः । सागरोद्देशमागम्य तपस्तेपे महातपाः ।
नियतो नियताहारश्चीराजिनजटाधरः । मलपङ्कधरो धीमान् बहून् वर्षगणान्मुनिः ।
स कदाचिन्महातेजा जलवासो महीपते । चचार लोकान् विप्रर्षिः प्रेक्षमाणो मनोजवः । । ९२८०
स चिन्तयामास मुनिर्ज्जलवासे कदाचन । विप्रेक्ष्य सागरान्तां वै महीं सवनकाननां ।
न मया सदृशोऽस्तीह लोके स्थावरजङ्गमे । अप्सु वैहायसं गच्छेन्मया योऽन्यः सहेति वै ।
अदृश्यमानो रक्षोभिर्ज्जलमध्येऽवदंस्तथा । अब्रुवंश्च पिशाचास्तं नैवं त्वं वक्तुमर्हसि ।
तुलाधारो वणिग्धर्म्मा वाराणस्यां महायशाः । सोऽप्येवं नार्हते वक्तुं यथा त्वं द्विजसत्तम ।
इत्युक्तो जाजलिर्भूतैः प्रत्युवाच महातपाः । पश्येयं तमहं प्राज्ञं तुलाधारं यशस्विनं । ९२८५
इति ब्रुवाणं तमृषिं रक्षांस्युद्धृत्य सागरात् । अब्रुवन् गच्छ पन्थानमास्थायेमं द्विजोत्तम ।
इत्युक्तो जाजलिर्भूतैर्ज्जगाम विमनास्तदा । वाराणस्यान्तुलाधारं समासाद्याब्रवीदिदं ।
॥ युधिष्ठिर उवाच ॥ किं कृतं दुष्करं तात कर्म्म जाजलिना पुरा । येन सिद्धिं परां प्राप्तस्तन्मे व्याख्यातु
मर्हसि ।
॥ भीष्म उवाच ॥ अतीव तपसा युक्तो घोरेण स बभूव ह । तथोपस्पर्शनरतः सायं प्रातर्म्महातपाः ।
अग्नीन् परिचरन् सम्यक् स्वाध्यायपरमो द्विजः । वानप्रस्थविधानज्ञो जाजलिर्ज्ज्वलितः श्रिया । ९२९०
वने तपस्यतिष्ठत् स न च धर्म्ममवैक्षत । वर्षास्वाकाशशायी च हेमन्ते जलसंश्रयः ।
वातातपसहो ग्रीष्मे न च धर्म्ममविन्दत । दुःखशय्यासु विविधा भूमौ च परिवर्त्तते ।
ततः कदाचित् स मुनिर्वर्षास्वाकाशमास्थितः । अन्तरीक्षाज्जलं मूर्द्ध्ना प्रत्यगृह्णान्मुहुर्म्मुहुः ।
अथ तस्य जटाः क्लिन्ना बभूवुर्ग्रथिताः प्रभो । अरण्यगमनान्नित्यं मलिनोऽमलसंयुतः ।
स कदाचिन्निराहारो वायुभक्षो महातपाः तस्थौ काष्ठवदव्यग्रो न चचाल च कर्हिचित् । ९२९५
तस्य स्म स्थाणुभूतस्य निर्व्विचेष्टस्य भारत । कुलिङ्गशकुनौ राजन्नीडं शिरसि चक्रतुः ।
स तौ दयावान ब्रह्मर्षिरुपप्रैक्षत दम्पती । कुर्व्वाणौ नीडकं तत्र जटासु तृणतन्तुभिः ।
यदा न स चलत्येव स्थाणुभूतो महातपाः । ततस्तौ सुखविस्वस्तौ सुखं तत्रोषतुस्तदा ।
अतीतास्वथ वर्षासु शरत्काल उपस्थिते । प्राजापत्येन विधिना विश्वासात् काममोहितौ ।

॥ भीष्म उवाच ॥ इत्युक्तः स तदा तेन तुलाधारेण धीमता । प्रोवाच वचनं धीमान् जाजलिर्ज्जपतांवरः ।
॥ जाजलिरुवाच ॥ विक्रीणतः सर्व्वरसान् सर्व्वगन्धांश्च वाणिज । वनस्पतीनोषधीश्च तेषां मूलफलानि च । ९२४०
अध्यगा नैष्ठिकीं बुद्धिं कुतस्त्वामिदमागतं । एतदाचक्ष्व मे सर्व्वं निखिलेन महामते ।
॥ भीष्म उवाच ॥ एवमुक्तस्तुलाधारो ब्राह्मणेन यशस्विना । उवाच धर्म्मसूक्ष्माणि वैश्यो धर्म्मार्थतत्त्ववित् ।
जाजलिं कष्टतपसं ज्ञानतृप्तस्तदा नृप ।
॥ तुलाधार उवाच ॥ वेदाहं जाजले धर्म्मं सरहस्यं सनातनं । सर्व्वभूतहितं मैत्रं पुराणं यं जना विदुः ।
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः । या वृत्तिः सा परो धर्म्मस्तेन जीवामि जाजले । ९२४५
परिच्छिन्नैः काष्ठतृणैर्मयेदं शरणं कृतं । अलक्तं पद्मकं तुङ्गं गन्धांश्चोच्चावचांस्तथा ।
रसांश्च तांस्तान् विप्रर्षे मद्यवर्ज्जान् बहूनहं । क्रीत्वा वै प्रतिविक्रीणे परहस्तादमायया ।
सर्व्वेषां यः सुहृन्नित्यं सर्व्वेषाञ्च हिते रतः । कर्म्मणा मनसा वाचा स धर्म्मं वेद जाजले ।
नानुरुध्ये विरुध्ये वा न द्वेश्मि न च कामये । समोऽहं सर्व्वभूतेषु पश्य मे जाजले व्रतं ।
तुला मे सर्व्वभूतेषु समा तिष्ठति जाजले । नाहं परेषां कृत्यानि प्रशंसामि न गर्हये । ९२५०
आकाशस्येव विप्रेन्द्र पश्यन् लोकस्य चित्रतां । इति मां त्वं विजानीहि सर्व्वलोकस्य जाजले ।
समं मतिमतां श्रेष्ठ समलोष्टाश्मकाञ्चनं । यथाऽन्धवधिरोन्मत्ता उच्छ्वासपरमाः सदा ।
देवैरपिहितद्वाराः सोपमा पश्यतो मम । यथा वृद्धातुरकृशा निस्पृहा विषयान् प्रति ।
तथाऽर्थकामभोगेषु ममापि विगता स्पृहा । यदा चायं न बिभेति यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा । यदा न कुरुते भावं सर्व्वभूतेषु पापकं । ९२५५
कर्म्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा । न भूतो न भविष्योऽस्ति न च धर्म्मोऽस्ति कश्चन ।
योऽभयः सर्व्वभूतानां स प्राप्नोत्यभयं पदं । यस्मादुद्विजते लोकः सर्व्वो मृत्युमुखादिव ।
वाक्क्रूराद्दण्डपरुषात्स प्राप्नोति महद्भयं । यथावद्वर्त्तमानानां वृद्धानां पुत्त्रपौत्त्रिणां ।
अनुवर्त्तामहे वृत्तमहिंस्राणां महात्मनां । प्रनष्टः शाश्वतो धर्म्मः सदाचारेण मोहितः ।
तेन वैद्यस्तपस्वी वा बलवान् वा विमुह्यते । आचाराज्जाजले प्राज्ञः क्षिप्रं धर्म्ममवाप्नुयात् । ९२६०
एवं यः साधुभिर्द्दान्तश्चरेदद्रोहचेतसा । नद्याश्चैव यथा काष्ठमुह्यमानं यदृच्छया ।
यदृच्छयैव काष्ठेन सन्धिं गच्छेत केनचित् । तत्रापराणि दारूणि संसृज्यन्ते परस्परं ।
तृणकाष्ठकरीषाणि कदाचिन्न समीक्षया । यस्मान्नोद्विजते भूतं जातु किञ्चित् कथञ्चन ।
अभयं सर्व्वभूतेभ्यः स प्राप्नोति सदा मुने । यस्मादुद्विजते विद्वन् सर्व्वलोको वृकादिव ।
क्रोशतस्तीरमासाद्य यथा सर्व्वे जलेचराः । एवमेवायमाचारः प्रादुर्भूतो यतस्ततः । ९२६५
सहायवान् द्रव्यवान् यः सुभगोऽन्य परस्तथा । ततस्तानेव कवयः शास्त्रेषु प्रवदन्त्युत ।
कीर्त्त्यर्थमल्पहृल्लेखाः पटवः कृत्स्ननिर्णयाः । तपोभिर्यज्ञदानैश्च वाक्यैः प्रज्ञाश्रितैस्तथा ।
प्राप्नोत्यभयदानस्य यद्यत्फलमिहाश्नुते । लोके यः सर्व्वभूतेभ्यो ददात्यभयदक्षिणां ।

स सर्व्वयज्ञैरीजानः प्राप्नोत्यभयदक्षिणां । न भूतानामहिंसाया ज्यायान् धर्म्मोऽस्ति कश्चन ।
यस्मान्नोद्विजते भूतं जातु किञ्चित् कथञ्चन । सोऽभयं सर्व्वभूतेभ्यः संप्राप्नोति महामुने । ९१७०
यस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव । न स धर्म्ममवाप्नोति इह लोके परत्र च ।
सर्व्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः । देवाऽपि मार्गे मुह्यन्ति अपदस्य पदैषिणः ।
दानं भूताभयस्याहुः सर्व्वदानेभ्य उत्तमं । ब्रवीमि ते सत्यमिदं श्रद्दधस्व च जाजले ।
स एव सुभगो भूत्वा पुनर्भवति दुर्भगः । व्यापत्तिं कर्म्मणां दृष्ट्वा जुगुप्सन्ति जनाः सदा ।
अकारणो हि नैवास्ति धर्म्मः सूक्ष्मो हि जाजले । भूतभव्यार्थमेवेह धर्म्मप्रवचनं कृतं । ९१७५
सूक्ष्मत्वान्न स विज्ञातुं शक्यते बहुनिह्नवः । उपलभ्यान्तरा चान्यानाचारानवबुध्यते ।
ये चाच्छिन्दन्ति वृषणान् ये च भिन्दन्ति नस्तकान् । वहन्ति महतो भारान् बध्नन्ति दमयन्ति च ।
हत्वा सत्त्वानि खादन्ति तान् कथं न विगर्हसे । मानुषा मानुषानेव दासभावेन भुञ्जते ।
वधबन्धनिरोधेन कारयन्ति दिवानिशं । आत्मनश्चापि जानाति यद्दुःखं वधबन्धने ।
पञ्चेन्द्रियेषु भूतेषु सर्व्वं वसति दैवतं । आदित्यश्चन्द्रमा वायुर्ब्रह्मा प्राणः क्रतुर्यमः । ९१८०
तानि जीवानि विक्रीय का मृतेषु विचारणा । अजोऽग्निर्व्वरुणो मेषः सूर्य्योऽश्वः पृथिवी विराट् ।
धेनुर्व्वत्सश्च सोमो वै विक्रीयैतन्न सिद्ध्यति । का तैले का घृते ब्रह्मन् मधुन्यप्यौषधेषु वा ।
अदंशमशके देशे सुखसंवर्द्धितान् पशून् । तांश्च मातुः प्रियान् जानन्नाक्रम्य बहुधा नराः ।
बहुदंशाकुलान् देशान्नयन्ति बहुकर्द्दमान् । वाहसम्पीडिता धुर्य्याः सीदन्त्यविधिना परे ।
न मन्ये भ्रूणहत्याऽपि विशिष्टा तेन कर्म्मणा । कृषिं साध्विति मन्यन्ते सा च वृत्तिः सुदारुणा । ९१८५
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखं । तथैवानडुहो युक्तान् समवेक्षस्व जाजले ।
अघ्न्या इति गवां नाम क एता हन्तुमर्हति । महच्चकाराकुशलं वृषं गां वालभेत्तु यः ।
ऋषयो यतयो ह्येतन्नहुषे प्रत्यवेदयन् । गां मातरञ्चाप्यवधीर्वृषभञ्च प्रजापतिं ।
अकार्य्यं नहुषाकार्षीर्लप्स्यामस्त्वत्कृते व्यथां । शतञ्चैकञ्च रोगाणां सर्व्वभूतेष्वपातयन् ।
ऋषयस्ते महाभागाः प्रजास्वेव हि जाजले । भ्रूणहं नहुषं त्वाहुर्न ते होष्यामहे हविः । ९१९०
इत्युक्त्वा ते महात्मानः सर्व्वे तत्त्वार्थदर्शिनः । ऋषयो यतयः शान्तास्तपसा प्रत्यवेदयन् ।
ईदृशान् शिवान् घोरानाचारानिह जाजले । केवलाचरितत्वात्तु निपुणो नावबुध्यसे ।
कारणाद्धर्म्ममन्विच्छेन्न लोकचरितश्चरेत् । यो हन्याद्यश्च मां स्तौति तत्रापि शृणु जाजले ।
समौ तावपि मे स्यातां न हि मेऽस्ति प्रियाप्रियं । एतदीदृशकं धर्म्मं प्रशंसन्ति मनीषिणः ।
उपपत्त्या हि सम्पन्नो यतिभिश्चैव सेव्यते । सततं धर्म्मशीलैश्च निपुणेनोपलक्षितः । ९१९५
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि तुलाधारजाजलिसंवादे त्रिषष्ट्यधिकद्विशतोऽध्यायः ॥ २६३ ॥
॥ जाजलिरुवाच ॥ अयं प्रवर्त्तितो धर्म्मस्तुलां धारयता त्वया । स्वर्गद्वारञ्च वृत्तिञ्च भूतानामवरोत्स्यते ।
कृष्या ह्यन्नं प्रभवति ततस्त्वमपि जीवसि । पशुभिश्चौषधीभिश्च मर्त्या जीवन्ति वाणिज ।

प्राप्नोति सुकृतैरात्मा प्राप्यस्येहेतरस्य च । मृन्मये भाजने पक्वे यथा वै नश्यति द्रवः ।
तथा शरीरं तपसा तप्तं विषयमश्नुते । विषयानश्नुते यस्तु न स भोक्ष्यत्यसंशयं ।
यस्तु भोगांस्त्यजेदात्मा स वै भोक्तुं व्यवस्यति । नीहारेण हि संवीतः शिश्नोदरपरायणः ।
जात्यन्ध इव पन्थानमावृतात्मा न बुध्यते । वणिग्यथा समुद्राद्वै यथार्थं लभते धनं । १०८७०
तथा मर्त्यार्णवे जन्तोः कर्म्म विज्ञानतो गतिः । अहोरात्रमये लोके जरारूपेण संचरन् ।
मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा । स्वयंकृतानि कर्म्माणि जातो जन्तुः प्रपद्यते ।
नाकृत्वा लभते कश्चित् किञ्चिदस्ति प्रियाप्रियं । शयानं यान्तमासीनं प्रवृत्तं विषयेषु च ।
शुभाशुभानि कर्म्माणि प्रपद्यन्ते नरं सदा । नह्यन्यत्तीरमासाद्य पुनस्तर्त्तुं व्यवस्यति ।
दुर्लभो दृश्यते ह्यस्य विनिपातो महार्णवे । यथा भारावसक्ता हि नौर्महाम्भसि तन्तुना । १०८७५
तथा मनोभियोगाद्वै शरीरं प्रचिकीर्षति । यथा समुद्रमभितः संश्रिताः सरितोऽपराः ।
तथाद्या प्रकृतिर्योगादभिसंश्रीयते सदा । स्नेहपाशैर्बहुविधैरासक्तमनसो नराः ।
प्रकृतिस्था विषीदन्ति जले सैकतवेश्मवत् । शरीरगृहसंस्थस्य शौचतीर्थस्य देहिनः ।
बुद्धिमार्गप्रयातस्य सुखन्त्विह परत्र च । विस्तराः क्लेशसंयुक्ताः संक्षेपास्तु सुखावहाः ।
परार्थं विस्तराः सर्व्वे त्यागमात्महितं विदुः । सङ्कल्पजो मित्रवर्गो ज्ञातयः कारणात्मकाः । १०८८०
भार्य्या पुत्रश्च दासश्च समर्थमुपभुञ्जते । न माता न पिता किञ्चित् कस्यचित् प्रतिपद्यते ।
दानपथ्योदनो जन्तुः स्वकर्म्मफलमश्नुते । माता पुत्रः पिता भ्राता भार्य्या मित्रजनस्तथा ।
अष्टापदपदस्थाने दक्षमुद्रेण लक्ष्यते ।
सर्व्वाणि कर्म्माणि पुरा कृतानि शुभाशुभान्यात्मनो यान्ति जन्तोः । उपस्थितं कर्म्मफलं विदित्वा बुद्धिं तथा चोदयतेऽन्तरात्मा ।
व्यवसायं समाश्रित्य सहायान् योऽधिगच्छति । न तस्य कश्चिदारम्भः कदाचिदवसीदति । १०८८५
अद्वैधमनसं युक्तं शूरं धीरं विपश्चितं । न श्रीः संत्यजते नित्यमादित्यमिव रश्मयः ।
आस्तिक्यव्यवसायाभ्यामुपायाद्विस्मयाद्धिया । समारभेदनिन्द्यात्मा न सोऽर्थः परिसीदति ।
सर्व्वः स्वानि शुभाशुभानि नियतं कर्म्माणि जन्तुः स्वयं गर्भात् संप्रतिपद्यते तदुभयं यत्तेन पूर्व्वं कृतं ।
मृत्युश्चापरिहारवान् समगतिः कालेन विच्छेदिना दारोश्चूर्णमिवाश्मसारविहितं कर्म्मान्तिकं प्रापयेत् ।
स्वरूपतामात्मकृतञ्च विस्तरं कुलान्वयं द्रव्यसमृद्धिसञ्चयं । नरो हि सर्व्वो लभते यथाकृतं शुभाशुभेनात्मकृतेन कर्म्मणा । १०८९०
॥ भीष्म उवाच ॥ इत्युक्तो जनको राजन् यथातथ्यं मनीषिणा । श्रुत्वा धर्म्मविदां श्रेष्ठः परां मुदमवाप ह ।
इति श्रीमहाभारते शान्तिपर्व्वणि मोक्षधर्म्मपर्व्वणि पराशरगीतायां त्रिशतोऽध्यायः ॥ ३०० ॥
॥ युधिष्ठिर उवाच ॥ सत्यं दमं क्षमां प्रज्ञां प्रशंसन्ति पितामह । विद्वांसो मनुजा लोके कथमेतन्मतं तव ।
॥ भीष्म उवाच ॥ अत्र ते वर्त्तयिष्येऽहमितिहासं पुरातनं । साध्यानामिह संवादं हंसस्य च युधिष्ठिर ।

